इत्यत्र तकारात् परः एकः यकारः, यणो मयः (वा. ९५६) इति क्रमजो द्वितीयः, तत्र मध्यमस्य वा लोपो भवति। आदित्यः, आदित्य्यः। आदित्यो देवता अस्य स्थालीपाकस्य इति आदित्य्यः इत्यत्रापि द्वौ यकारौ क्रमजस्तृतीयः। तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। हलः इति किम्? आम्रम्। यमाम् इति किम्? अग्निः। अर्घ्यम्। यमि इति किम्? शार्ङ्गम्॥

## झरो झरि सवर्णे। (६५/७१)

[1]हलः इति वर्तते, अन्यतरस्याम् इति [2]च। हल उत्तरस्य झरो झरि सवर्णे परतो लोपो भवति अन्यतरस्याम्। प्रत्तम्, अवत्तम् इत्यत्र त्रयस्तकाराः, क्रमजश्चतुर्थः। तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। मरुत्त्तः इत्यत्र चत्वारस्तकाराः, क्रमजः पञ्चमः। तत्र मध्यमस्य मध्यमयोः मध्यमानां वा लोपो भवति। मरुच्छब्दस्य हि उपसङ्ख्यानसामर्थ्यात् (वा. ६७) 'अच उपसर्गात्तः' (७.४.४७/३०७८) इति तत्वं भवति। झरः इति किम्? शार्ङ्गम्। झरि इति किम्? प्रियपञ्च्ञा। अल्लोपस्य च 'पूर्वत्रासिद्धे न [3]स्थानिवत्' (पु.वृ. ११२) इति स्थानिवद्भाव[4]प्रतिषेधात् चकारस्य ञकारे लोपः स्यात्। सवर्णे इति किम्? तर्प्ता। तर्प्तुम्। तर्प्तव्यम्। सवर्णग्रहणसामर्थ्यात् इह सङ्ख्यातानुदेशो न भवति, [5]सवर्णमात्रे लोपो विज्ञायते। तेन शिण्ढि, पिण्ढि इति ढकारे[6] डकारस्य लोपो भवति॥

## उदात्तादनुदात्तस्य स्वरितः। (६६/३६६०)

उदात्तात् [7]उत्तरस्य अनुदात्तस्य स्वरितादेशो भवति। गार्ग्यः। वात्स्यः। पचति। पठति। अस्य स्वरितस्य असिद्धत्वात् 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८/३६५०) इत्येतन्न प्रवर्तते। तेन [8]उदात्तस्वरितौ उभावपि श्रूयेते॥

## नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्। (६७/३६६१)

उदात्तोदयस्य स्वरितोदयस्य च अनुदात्तस्य स्वरितो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते, अगार्ग्यकाश्यपगालवानां [9]मतेन। उदात्त उदयो यस्मात् स उदात्तोदयः। उदात्तपरः इत्यर्थः। एवं स्वरितोदयः[10]। उदात्तोदयस्तावत् – गार्ग्यस्तत्र। वात्स्यस्तत्र। तत्रशब्द आद्युदात्तः। तस्मिन्नुदात्ते परतो गार्ग्यशब्दः स्वरितो न भवति। स्वरितोदयः– गार्ग्यः क्व। वात्स्यः क्व। क्वशब्दः स्वरितः, तस्मिन् परतः [11]अनुदात्तः स्वरितो न भवति। अगार्ग्यकाश्यपगालवानाम् इति किम्? [12]गार्ग्यस्तत्र। गार्ग्यः क्व। तेषां हि मतेन स्वरितो भवत्येव। उदात्तस्वरितपरस्य इति [13]वक्तव्ये उदयग्रहणं मङ्गलार्थम्। अनेकाचार्यसङ्कीर्तनं पूजार्थम्॥

---

1. वाक्यमिदं नास्ति ब. 2. वा. 3. स्थानिवद्भावः क. 4. प्रतिषेधत्वात् क. 5. तेन इत्यधिकम् क. 6. परतः इत्यधिकम् क. 7. परस्य इ. 8. उदात्तश्च भवति स्वरितश्च श्रूयते ब, उदात्तः च स्वरितः च इ. 9. आचार्याणाम् इत्यधिकम् ब. क. इ. ह. 10. स्वरितपरः इत्यर्थः इत्यधिकम् क. 11. अनुदात्तस्य ब, पूर्वस्य स्वरितो न भवति क. 12. गार्ग्यसूतः वात्स्यसूतः ह. 13. एवं इत्यधिकम् क.